# श्री दस महाविद्या कवच एवं स्तोत्र

धूप दीपक पुष्पादि द्वारा गुरु, गणेश, नवग्रह आदि का पूजन करके भगवती के समक्ष कवच का पाठ आरम्भ करना चाहिये। विशेष संकट में नित्य 11 पाठ दो समय अवश्य करने चाहिये। अंतमें एक पाठ शिव अथवा भैरव कवच का पाठ भी करना चाहिये। शत्रुभय, रोग, अथवा आत्मसुरक्षा में यह कवच पाठ लाभकारी है।

**विनियोगः–** ॐ अस्य श्री महाविद्या कवचस्य श्रीसदाशिव ऋषिः, उष्णिक् छन्दः, श्रीमहाविद्या देवता, सर्वसिद्धिप्राप्तयर्थे पाठे विनियोगः।

**ऋष्यादिन्यासः–** श्रीसदाशिव ऋषये नमः शिरसि। उष्णिक् छन्दसे नमः मुखे, श्रीमहाविद्यादेवतायै नमः हृदि, सर्वसिद्धिप्राप्तयर्थे पाठे विनियोगाय नमः सर्वांगे।

**कवचम्–** ॐ प्राच्यां रक्षतु मे तारा कामरूपनिवासिनी। आग्नेय्यां षोडशी पातु याम्यां धूमावती स्वयम्।1।

नैर्ऋत्यां भैरवी पातु वारुण्यां भुवनेश्वरी। वायव्यां सततं पातु छिन्नमस्ता महेश्वरी।2।

GURUDEV RAJ VERMA
9897507933
7500292413

कौबेर्यां पातु मे देवी श्रीविद्या बगलामुखी। ऐशान्यां पातु मे नित्यं महात्रिपुरसुन्दरी।3।

ऊर्ध्वं रक्षतु मे विद्या मातंगीपीठवासिनी। सर्वतः पातु मे नित्यं कामाख्या कालिका स्वयम्।4।

ब्रह्मरूपा महाविद्या सर्वविद्यामयी स्वयम्। शीर्षे रक्षतु मे दुर्गा भालं श्रीभवगेहिनी।5।

त्रिपुरा भ्रूयुगे पातु शर्वाणी पातु नासिकाम्। चक्षुषी चण्डिका पातु श्रोत्रे नीलसरस्वती।6।

मुखं सौम्यमुखी पातु ग्रीवां रक्षतु पार्वती। जिह्वां रक्षतु मे देवी जिह्वाललनभीषणा।7।

वाग्देवी वदनं पातु वक्षः पातु माहेश्वरी। बाहु महाभुजा पातु करांगुलीः सुरेश्वरी।8।

पृष्ठतः पातु भीमास्या कटयां देवी दिगम्बरी। उदरं पातु मे नित्यं महाविद्या महोदरी।9।

उग्रतारा महादेवी जंघोरू परिरक्षतु। गुदं मुष्कं च मेढ्रं च नाभिं च सुरसुन्दरी।10।

GURUDEV RAJ VERMA
9897507933
7500292413

पादांगुलीः सदा पातु भवानी त्रिदशेश्वरी। रक्तमांसास्थिमज्जादीन् पातु देवी शवासना।11।

महाभयेषु घोरेषु महाभयनिवारिणी। पातु देवी महामाया कामाख्यापीठनिवासिनी।12।

भस्माचलगता दिव्यसिंहासनकृताश्रया। पातु श्रीकालिकादेवी सर्वोत्पातेषु सर्वदा।13।

रक्षाहीनं तु यत्स्थानं कवचेनापि वर्जितम्। तत्सर्वं सर्वदा पातु सर्वरक्षणकारिणी।14।

---

**श्रीदशमहाविद्या स्तोत्रम्–** ॐ नमस्ते चण्डिके चण्डि चण्डमुण्डविनाशिनी। नमस्ते कालिके कालमहाभयविनाशिनी।1।

शिवे रक्ष जगद्धात्रि प्रसीद हरवल्लभे। प्रणमामि जगद्धात्रीं जगत्पालनकारिणीम्।2।

जगत् क्षोभकरीं विद्यां जगत्सृष्टिविधायिनीम्। करालां विकटां घोरां मुण्डमालाविभूषिताम्।3।

हरार्चितां हराराध्यां नमामि हरवल्लभाम्। गौरीं गुरुप्रियां गौरवर्णालंकारभूषिताम्।4।

हरिप्रियां महामायां नमामि ब्रह्मपूजिताम्। सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम्।5।

मंत्रसिद्धिप्रदां योनिसिद्धिदां लिंगशोभिताम्। प्रणमामि महामायां दुर्गां दुर्गतिनाशिनीम्।6।

उग्रामुग्रमयीम् उग्रताराम् उग्रगणैर्युताम्। नीलां नीलघनश्यामां नमामि नीलसुन्दरीम्।7।

श्यामांगीं श्यामघटितां श्यामवर्णविभूषिताम्। प्रणमामि जगद्धात्रीं गौरीं सर्वार्थसाधिनीम्।8।

विश्वेश्वरीं महाघोरां विकटां घोरनादिनीम्। आद्यामाद्य गुरोराद्यामाद्यनाथप्रपूजिताम्।9।

श्रीं दुर्गां धनदामन्नपूर्णां पद्मां सुरेश्वरीम्। प्रणमामि जगद्धात्रीं चन्द्रशेखरवल्लभाम्।10।

त्रिपुरां सुन्दरीं बालामबलागणभूषिताम्। शिवदूतीं शिवाराध्यां शिवध्येयां सनातनीम्।11।

सुन्दरीं तारिणीं सर्वशिवागणविभूषिताम्। नारायणीं विष्णुपूज्यां ब्रह्मविष्णुहरप्रियाम्।12।

सर्वसिद्धिप्रदां नित्यामनित्यां गुणवर्जिताम्। सगुणां निर्गुणां ध्येयामर्चितां सर्वसिद्धिदाम्।13।

विद्यां सिद्धिप्रदां विद्यां महाविद्यां महेश्वरीम्। महेशभक्तां माहेशीं महाकालप्रपूजिताम्।14।

प्रणमामि जगद्धात्रीं शुम्भासुरविमर्दिनीम्। रक्तप्रियां रक्तवर्णां रक्तबीजविमर्दिनीम्।15।

भैरवीं भुवनां देवीं लोलजिह्वां सुरेश्वरीम्। चतुर्भुजां दशभुजामष्टादशभुजां शुभाम्।16।

त्रिपुरेशीं विश्वनाथप्रियां विश्वेश्वरीं शिवाम्। अट्टहासामट्टहासप्रियां धूम्रविनाशिनीम्।17।

कमलां छिन्नभालांच मातंगी सुरसुन्दरीम्। षोडशीं विजयां भीमां धूमांच बगलामुखीम्।18।

सर्वसिद्धिप्रदां सर्वविद्यामंत्रविशोधिनीम्। प्रणमामि जगत्तारां सारांच मंत्रसिद्धये।19।

इत्येवंच वरारोहे स्तोत्रं सिद्धिकरं परम्। पठित्वा मोक्षमाप्नोति सत्यं वै गिरिनन्दिनी।20।

---

**Gurudev Raj Verma**

GURUDEV RAJ VERMA
9897507933
7500292413

**Mob- +91-9897507933**

**WhatsApp- +91-7500292413**

**Website- mahakalshakti.wordpress.com**

**Website- www.scribd.com/mahakalshakti**

**Email- mahakalshakti@gmail.com**